वह्निरुवाच ।
"अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम् ।
रतिपुत्रफला दारा: शीलवृत्तफलं श्रुतम् ॥"
इति वह्निपुराणे नित्याह्निकस्नानविधिनामाध्याय: ॥*॥ लवणादिसंयोगे फलस्यान्नत्वं यथा,
"तण्डुलोम्बुग्निसंयोगाल्लवणयोगेन पिष्टकम् ।
फलं त्रितयसंयोगादन्नं भवति तत्क्षणात् ॥"
इति रामार्च्चनचन्द्रिकाधृतवचनमिति केचित् ॥

फल:, पुं, ( फलतीति । फल+अच् । ) कुटजवृक्ष: । इति शब्दरत्नावली ॥ ( यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"काष्ठकारिकाफलपटोलवार्त्ताकुकारवेल्लककर्कोटिकाकेबुकोरुबूकपर्पटकिरातितिक्तकर्कोटकारिष्टकोशातकीवेत्रकरीराटरुषकार्कपुष्पीप्रभृतीनि ॥")

फलकं, क्ली, पुं, ( फल+संज्ञायां कन् । ) चर्म्म । इत्यमर: । २ । ८ । ६० ॥ ढाल इति भाषा ॥ ( यथा, विष्णुपादादिकेशान्तवर्णनस्तोत्रे । ३३ ।
"शार्ङ्गं बाणं कृपाणं फलकमरिगदे पद्मशङ्खौ सहस्रम्
बिभ्राणा: शस्त्रजालं मम ददतु हरेर्बाहवो मोहहानिम् ॥")

फलक:, पुं, (फल+संज्ञायां कन् ।) अस्थिखण्डम् । इति जटाधर: ॥ नागकेशरम् । इति शब्दचन्द्रिका ॥ काष्ठादिफलकम् । यथा,—
"पाण्डुलेख्येन फलके भूमौ वा प्रथमं लिखेत् ।
ऊनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥"
इति व्यवहारतत्त्वे व्यास: ॥
( यथा, मार्कण्डेये । ८७ । ५ ।
"भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥")
रजकपट्टम् । धोपार पाट इति भाषा । यथा,
"शाल्मले फलके श्लक्ष्णे निर्ण्णिज्याद्वासांसि नेजक: ।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥"
इति मिताक्षरा ॥

फलकपाणि:, पुं, ( फलकं पाणौ यस्य । ) चर्म्मी । इत्यमर: ॥ २ । ८ । ७१ ॥ ढाली इति भाषा ॥

फलकर्कशा, स्त्री, ( फलेन कर्कशा । ) वनकोलि: । इति केचित् ॥

फलकाम:, त्रि, ( फलं कामयते इति । कम+अण् । ) कर्म्मफलकामी । यथा,—
"कर्म्मवाणिजिका मूढा: फलकामा नराधमा: ।
अर्च्चयन्ति जगन्नाथं ते कामान्नाप्नुवन्त्युत ॥"
इति मलमासतत्त्वधृतविष्णुधर्म्मोत्तरीयतृतीयकाण्डीयवचनम् ।

फलकी, [न्] पुं, ( फलकं फलकाकारोऽस्त्यस्येति । फलक+इनि: । ) मत्स्यभेद: । फलुइ इति भाषा । ( गुणादिकमस्य फलिशब्दे ज्ञातव्यम् । ) फलकान्विते, त्रि । इति मेदिनी । ने, १६ ॥

फलकृष्ण:, पुं, (फले फलावच्छेदे कृष्ण: ।) पानीयामलकम् । इति शब्दचन्द्रिका ॥

फलकेशर:, पुं, ( फले केशरा इवास्य । ) नारीकेलवृक्ष: । इति जटाधर: ॥

फलकोषक:, पुं, (फलं मुष्क एव कोषो यत्र । तत: कन् ।) मुष्क: । इति त्रिकाण्डशेष: ॥ (विवृतिरस्य मुष्कशब्दे ज्ञातव्या ॥)

फलग्रहि:, त्रि, ( फलं गृह्णातीति । ग्रह+इन् । ) फलेग्रहि: । यथासमयं फलधरवृक्ष: । इत्यमरटीकायां भरत: ॥

फलग्राही, [न्] पुं, ( फलं गृह्णातीति । ग्रह+णिनि: । ) वृक्ष: । इति धरणि: ॥ फलग्रहणकर्त्तरि, त्रि ॥

फलचमस:, पुं, दधिमिश्रितवटवल्कचूर्णम् । इति आह्निकतत्त्वम् ॥

फलचोरक:, पुं, (फलं चोर इवास्य कन् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्ट: ॥

फलत्रयं, क्ली, ( फलस्य त्रयम् । ) द्राक्षापरूषकाश्मर्य: । ( यथा,—
"द्राक्षापरूषकाश्मर्य्य: फलत्रयमुदाहृतम् ॥"
इति वैद्यकपरिभाषायाम् ॥)
त्रिफला । इति शब्दचन्द्रिका ॥

फलत्रिकं, क्ली, ( फलस्य त्रिकम् । ) त्रिफला । ( यथा,—
"पथ्याविभीतधात्रीणां फलै: स्यात्त्रिफला समै: ।
फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शुण्ठीपिप्पलीमरिचानि । इत्यमर: ।२।९।१११॥

फलद:, पुं, ( फलं ददातीति । दा+"आतोऽनुपसर्गे ।" ३ । २ । ३ । इति क: । ) वृक्ष: । इति धरणि: ॥

फलद:, त्रि, ( फलं ददातीति । दा+क: । ) फलदाता । यथा,—
"विशिष्टफलदा कन्या निष्कामाणां विमुक्तिदा ॥"
इति मलमासतत्त्वधृतविष्णुपुराणवचनम् ॥

फलपञ्चाम्लं, क्ली, अम्लपञ्चफलम् । इति राजनिर्घण्ट: ॥

फलपाक:, पुं, ( फलेषु पाकोऽस्य । ) करमर्द्दक: । इत्यमरटीकायां भरत: ॥ पानीयामलकम् । इति शब्दचन्द्रिका ॥

फलपाकान्ता, स्त्री, (फलपाकेनान्तो नाशो यस्या: ।) ओषधि: । धान्यकदल्यादि: । इत्यमर: ।२।४।७॥

फलपाकी, [न्] पुं, (फलपाकोऽस्त्यस्येति । इनि: ।) गर्द्दभाण्ड: । इति रत्नमाला ॥ (यथास्य पर्य्याय: ।
"नन्दीवृक्षस्ताम्रपाकी फलपाकी च पीतन: ।
गर्द्दभाण्डो गन्धमुण्डो द्वितीय: क्षिप्रपाक्यसौ ॥"
इति च वैद्यकरत्नमालायाम् )

फलपुच्छ:, पुं, (फलं पुच्छ इव यस्य ।) वरण्डालु: । इति त्रिकाण्डशेष: ॥

फलपुष्पा, स्त्री, (फलानि पुष्पाणीवास्या: ।) पिण्डखर्ज्जूरी । इति राजनिर्घण्ट: ॥

फलपूर:, पुं, ( फलेन पूर: पूर्ण: । ) बीजपूर: । इत्यमर: । २ । ४ । ७८ ॥ (विवरणमस्य बीजपूरशब्दे ज्ञातव्यम् ॥)

फलपूरक:, ( फलपूर+स्वार्थे कन् । ) बीजपूर: । इति भावप्रकाश: ॥

फलप्रद:, त्रि, ( फलं प्रददातीति । प्र+दा+"आतश्चोपसर्गे ।" ३ । १ । १३६ । इति क: ।) फलदाता । यथा,—
"क्रीणीहि भो: फलानीति श्रुत्वा सत्वरमच्युत: ।
फलार्थी धान्यमादाय ययौ सर्व्वफलप्रद: ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्याय: ॥

फलप्रिया, स्त्री, ( फलेन प्रीणातीति । प्री+क: । टाप् ।) प्रियङ्गु: । इति राजनिर्घण्ट: ॥ (गुणादयोऽस्या प्रियङ्गुशब्दे ज्ञेया: ॥)

फलभाक्, [ज्] त्रि, ( फलं भजते इति । भज+"भजो ण्वि: ।" ३ । २ । ६२ । इति ण्वि: । ) फलभागी । यथा,—
"मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वश: ।
उल्लेखनमकुर्व्वाणो न तस्य फलभाग्भवेत् ॥"
इति तिथ्यादितत्त्वधृतब्रह्माण्डभविष्यपुराणवचनम् ॥

फलभूमि:, स्त्री, (फलाय कर्म्मफलभोगाय भूमि: ।) कर्म्मफलभोगस्थानम् । यथा,—
"भरतान्यैरावतानि विदेहाश्च कुरून् विना ।
वर्षाणि कर्म्मभूम्य: स्यु: शेषाणि फलभूमय: ॥"
इति हेमचन्द्र: । ४ ।१२ ॥

फलमुख्या, स्त्री, ( फलेन मुख्या श्रेष्ठा । ) अजमोदा । इति राजनिर्घण्ट: ॥

फलमुद्गरिका, स्त्री, ( फले फलावच्छेदे मुद्गरिका क्षुद्रमुद्गर इव । ) पिण्डखर्ज्जूर: । इति शब्दमाला ॥

फललक्षणा, स्त्री, ( फलहेतुका लक्षणा । ) प्रयोजनवती लक्षणा । यथा, साहित्यदर्पणे ।
"व्यङ्ग्यस्य गूढागूढत्वाद्द्विधा स्यु: फललक्षणा: ।"

फलवर्त्तुलं, क्ली, ( फलं वर्त्तुलमस्य । ) कालिङ्गम् । इति राजनिर्घण्ट: ॥

फलवान्, [त्] त्रि, ( फलमस्यास्तीति । फल+मतुप् । मस्य व: ।) फलयुक्तवृक्ष: । तत्पर्य्याय: । फलिन: २ फली ३ । इत्यमर: ॥ फलित: ४ । इति राजनिर्घण्ट: ॥ (यथा, मनु: । १ । ४७ ।
"अपुष्पा: फलवन्तो ये ते वनस्पतय: स्मृता: ।
पुष्पिण: फलिनश्चैव वृक्षास्तूभयत: स्मृता: ॥")

फलविक्रयिणी, त्रि, ( फलविक्रयोऽस्या अस्तीति । इनि: । ङीप् । ) फलविक्रेत्री । कुञ्जड़ायिनी इति हिन्दी भाषा । यथा,—
"फलविक्रयिणी तस्य च्युतधान्यकरद्वयम् ।
फलैरपूरयद्रत्नै: फलभाण्डमपूरि च ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्याय: ॥

फलवृक्षक:, पुं, ( फलप्रधानो वृक्ष: । संज्ञायां कन् । ) पनस: । इति राजनिर्घण्ट: ॥
(पनसशब्देऽस्य विशेषो व्याख्यात: ॥)

फलशाकं, क्ली, ( फलमेव शाकम् । ) षड्विधशाकान्तर्गतफलरूपशाकम् । यथा, राजवल्लभे ।
"पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्याद्यथोत्तरम् ॥"